# Master of Arts Examination, 2019

(2nd Year, 4th Semester)

**SANSKRIT**

**Course : XIX / E**

## [ Physical and Historical Geography of Ancient India ]

Full Marks : 30 | Time : Two Hours

*The figures in the margin indicate full marks.*

१। अधोलिखितेषु **पञ्च** प्रश्नाः आङ्गलभाषया समाधेयाः। 2×5=10

(क) पुण्ड्राणामादितम उल्लेखः कुत्र प्राप्यते? सेननृपेषु शासत्सु पुर्ड्रवर्धनस्य विस्तारः कीदृशः संवृत्तः?

(ख) नयपालदेवस्य इर्दाशासने वर्धमानभुक्तिः कियदवधि विस्तृतासीत्? पालसेननृपाणां शासनकाले इयं भुक्तिः केषु प्राशासनिकोपविभागेषु विभक्तासीदिति नीहाररञ्जनरायाणां विमर्शः?

(ग) Francis Buchanon इत्येतेषां मतेन वङ्ग इति अभिधया कस्य स्थानस्य बोधोऽभवत्? Bhau Daji महोदयैः अस्मिन् विषये किमुच्यते?

(घ) ग्रन्थात्मकेषु आकरेषु समतटस्य आदितम उल्लेखः कुत्र प्राप्यते? तत्र तस्य नाम कैः प्रदेशान्तरैः सह उल्लिखितम्? Yijing इति चैनिकपरिव्राजकेन समतटस्य कः शासक उल्लिख्यते?

[*Turn over*]

(ङ) *डाकार्णव*-ग्रन्थे केभ्यः प्रदेशेभ्यो हरिकेलस्य भिन्नता प्रतिपादिता ?

(च) पट्टिकेराया अधुनातनमवस्थानमुच्यताम्। प्रत्नतात्त्विकोत्खननेभ्योऽस्य स्थानस्य विषये किं ज्ञायते ? *पट्टिकेरे चुन्दावरभवने चुन्दा* — इति कस्मिन् ग्रन्थे प्राप्यते ?

(छ) ताम्रलिप्तस्य समुद्रवाणिज्यकेन्द्ररूपेण माहात्म्यं कुतो ज्ञायते ?

२। अधोलिखितेषु **चत्त्वारः** प्रश्नाः समाधेयाः। 5×4=20

(क) नदीस्तुतौ उल्लिखितां वितस्तामाश्रित्य भौगोलिकी आलोचना कार्या।

(ख) कुलपर्वतशब्दस्य अर्थो व्याख्येयः। पारियात्रपर्वतमाश्रित्य निबन्धो रच्यताम्। 4+1

(ग) भारतवर्षस्य नवभेदानां भौगोलिकपरिचया यथासंभवं देयाः।

(घ) आदिमध्ययुगे दक्षिणपूर्ववङ्गस्य परिवर्तमानं राजनैतिकभूगोलं ताम्रशासनेभ्यो यथा ज्ञायते तथा वर्ण्यताम्।

(ङ) अशोकराजस्य अभिलेखा यथा भारतवर्षस्य विविधस्थानेषु स्थापिताः तथा उल्लिख्य तेषाम् ऐतिहासिकभूगोलसंबद्धं गौरवं निणीयताम्।

(च) उत्तरभारते दक्षिणभारते च राजनैतिकभूगोलस्य विवर्तनं समुचितानामाकराणाम् उल्लेखपूर्वकं प्रदर्शनीयम्।

(छ) भारतभूगोलसंस्थाने हिमवतः प्राधान्यं प्राचीनाकरानुसारम् आलोच्यताम्।

---